# Shri Rajarajeshvari Stuti or Rajarajeshvaryashtakam

# શ્રીરાજરાજેશ્વર્યાઃ સ્તુતિઃ અથવા રાજરાજેશ્વર્યષ્ટકમ્

## Document Information

Text title : Shri Rajarajeshvari Stuti or Rajarajeshvaryashtakam

File name : rAjarAjeshvaryaShTakam.itx

Category : devii, dashamahAvidyA, aShTaka

Location : doc_devii

Author : rAjAnaka vidyAdhara

Transliterated by : Girdhari Lal koul glkoul.18 at gmail.com

Proofread by : Girdhari Lal koul glkoul.18 at gmail.com

Latest update : November 30, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 30, 2019

*sanskritdocuments.org*

# શ્રીરાજરાજેશ્વર્યાઃ સ્તુતિઃ અથવા રાજરાજેશ્વર્યષ્ટકમ્

ૐ નમઃ પરાશક્તયે ।
આદિક્ષાન્ત સમસ્તવર્ણવિભવા યામાતૃકારૂપિણી
મન્ત્રવીર્ય પરામૃતરસા સ્વાદાત્સુખદાયિની ।
ભાવવ્રાત સમુદ્રગર્ભલહરી શબ્દાર્થતત્ત્વવ્યાપિની
સા માં પાતુ સરસ્વતી ભગવતી શ્રીરાજરાજેશ્વરી ॥ ૧॥

વાચ્ય વાચક સારપૂર્ણ વિભવા દેવી ષડધ્વાશ્રયા
શ્રીચક્રાન્તરવહ્નિકોણ નિલયાયા બિન્દુમાત્રાત્મિકા ।
સૂક્ષ્માત્સૂક્ષ્મતરા પરામૃતમયી નિત્યં જગત્તર્પિની
સા માં પાતુ સરસ્વતી ભગવતી શ્રીરાજરાજેશ્વરી ॥ ૨॥

પૂર્ણાહન્ત્વવિમર્શ પાવનકરી નિત્યં મલક્ષાલિની
ભક્તાનાં ભવભીતિ ભઞ્જનકરી હૃત્પઙ્કજે સંસ્થિતા ।
બાહ્યાભ્યન્તરચારિણી સુરસતો હંસેનયા સેવિતા
સા માં પાતુ સરસ્વતી ભગવતી શ્રીરાજરાજેશ્વરી ॥ ૩॥

ઉર્ધ્વાધઃ સ્થિતનાડિવૃન્દવિભવે સઞ્જીવિકામધ્યમા
સ્વાત્મામર્શન તત્પરૈશ્ચ સતતં ભક્તૈઃ ખલુ પ્રાપ્યતે ।
મૂલાદ્ બ્રહ્મબિલાવધિતડિદિવયા બ્રહ્મનાડી સ્મૃતા
સા માં પાતુ સરસ્વતી ભગવતી શ્રીરાજરાજેશ્વરી ॥ ૪॥

વર્ણાવર્ણનિવર્ણ ભેદ નિવહાતત્રાપ્યભેદાત્મિકા
વેદાન્તાગમતન્ત્ર સાર મહિમાષડ્દર્શનોલ્લઙ્ઘિની ।
સર્વાચાર વિચાર પાલન પરાયાનિર્ગતા ચારકા
સા માં પાતુ સરસ્વતી ભગવતી શ્રીરાજરાજેશ્વરી ॥ ૫॥

ૐ તત્સદિતિનામભિર્નિગદિતા સર્વાગમે યોગિભિઃ
તત્પ્રાણાન્ત વિચાર્યભક્ત નિબહૈઃ હ્રીતમિવ શષ્પવત્ ।
ઐન્દ્રં-ધામ વિહાય ક્ષીણકલુષૈર્મોક્ષાય યા સ્વીકૃતા

સા માં પાતુ સરસ્વતી ભગવતી શ્રીરાજરાજેશ્વરી ॥ ૬॥

સૌરં જ્યોતિરિદમપિ પરિમિતંહ્રીતં તથા યત્પદાત્
ૐઇત્યેતદ્વિમર્શનેન સતતં સર્વમિદં સ્વાત્મનિ ।
રક્તેસ્તત્પદ પ્રેપ્સુભિઞ્ચ મુનિભિઃસ્વસ્થૈ સદાસ્વીકૃતં
સા માં પાતુ સરસ્વતી ભગવતી શ્રીરાજરાજેશ્વેરી ॥ ૭॥

તૈસ્તૈર્યોગિવરૈઃ સદા કવિયશોનક્રં દિનં યત્પદ-
ધ્યાનાવસ્થિત તદ્ ગતેન મનસા પ્રાપ્તં મહત્ નિર્મલમ ।
મોક્ષં ભોગં દદાતિ યા પ્રભુદિતા વિદ્યાધરૈર્વન્દિતા
સા માં પાતુ સરસ્વતી ભગવતી શ્રીરાજરાજેશ્વરી ॥ ૮॥

ઇતિ શ્રીરાજરાજેશ્વર્યાઃ સ્તુતિઃ રાજાનક વિદ્યાધર વિરચિતા શુભાયાસ્તુ ।
ઇતિ શિવમ્ ।

Encoded and proofread by Girdhari Lal koul glkoul.18 at gmail.com
Send corrections to sanskrit@cheerful.com

*Shri Rajarajeshvari Stuti or Rajarajeshvaryashtakam*

pdf was typeset on November 30, 2019

Please send corrections to *sanskrit@cheerful.com*